# INDIAN SCHOOL AL WADI AL KABIR

| Class: VI – Sec - | Department: Sanskrit 2nd Lang | Date of submission: N.A |
|---|---|---|
| Worksheet | Topic: **अपठित गद्यांश** | Note: Pl. file in portfolio |

**नाम:** ---------------------------------- **अनुक्रमांक:** _____

अधोलिखितम् अनुच्छेदम् पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

कस्मिंश्चित् वने कपोतानाम् एकं दलं वसति स्म । एक: वृध्द: कपोत: दलस्य नेता संरक्षकश्च आसीत् । प्रतिदिनम् कपोता: अरण्ये दानान् अन्विष्यन्ति उदरपूर्तिम् च कुर्वन्ति स्म ।

एकदा एक: व्याध: तत्रागत: । आकाशे अनेकान् कपोतान् वीक्ष्य स: अतीव प्रसन्न: अभवत्, सोऽचिन्तयत् - अहो मे सौभाग्यम्! परम् इदानीं तु सायंकाल: सञ्जात: किम् करोमि । अस्तु, श्व: इह आगत्य तंडुलकणान् विकिरिष्यामि । विपुल तंडुलराशिम् दृष्ट्वा एते कपोता: भूमौ अवतरिष्यन्ति । तस्मिन् एव काले अहं सर्वान् कपोतान् जालबध्दान् करिष्यामि ।

**(क) एकपदेन उत्तरत -**

(i) एकदा तत्र क: आगत: ? ...................................... ।

(ii) केषाम् दलं वने वसति स्म ? .................................... ।

(iii) व्याध: कान् दृष्ट्वा प्रसन्न: अभवत् ? ...................................... ।

(iv) कपोता: कुत्र अवतरिष्यन्ति ? ...................................... ।

**(ख) पूर्णवाक्येन उत्तरत -**

(i) व्याध: किमर्थं प्रसन्न: अभवत् ? ........................................................... ............................................................................................................ ।

(ii) व्याध: तण्डुलकणान् विकीर्य किम् कर्तुम् इच्छति स्म ? ........................... ............................................................................................................. ।

**(ग) यथानिर्देशम् उत्तरत ।**

(i) 'अरण्ये' पदे का विभक्ति: ? ............................................ ।

(ii) 'करिष्यामि' पदे क: धातु अस्ति ? ............................................ ।

(iii) 'प्रतिदिनम् ...................... कुर्वन्ति स्म ।' इति वाक्ये क्रियापदस्य कर्तृपदम् किम् अस्ति ?

(iv) 'आकाशे' इति पर्यायवाचिपदम् किम् ? ............................................ ।



-------------------------------- ***** ----------------------------------